# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- आचार्य-२ (SEM-3) | प्रश्नपत्र-४ | गुणाः - ७० |
| विषयः- साहित्यम्-नाट्यवर्गः | CC-539 | समयः - ०३ तः ०६ |
| दिनाङ्कः - २८/११/२०१६ | सन्दर्भग्रन्थः - नाट्यदर्पणः | |

॥ प्रथमान्वितिः ॥

**प्र-१ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत । ०८**

१. नाट्यदर्पणस्य मङ्गलपद्यम् ।

२. नाटकस्वरूपम् ।

३. नाटकस्य चातुर्विध्यम् ।

**प्र-२ कस्याप्येकस्य विषये विवरणं कुरुत । ०८**

१. नाट्यशास्त्रोद्भवः तद्विकासश्च ।

२. नाट्यदर्पणप्रणेतुः इतिवृत्तम् ।

**प्र-३ द्वयोः टिप्पणी लेख्या । ०४**

१. किं नाम प्रसङ्गिकवृत्तम्?

२. प्रकाशस्वगतयोः को भेदः?

३. रूपकप्रकाराः के?

॥ द्वितीयान्वितिः ॥

**प्र-४ एकस्य समीक्षां कुरुत । ०८**

१. नाटकानुरूप - गद्यपद्ययोः स्वरूपोचितप्रयोगः ।

२. अङ्कलक्षणनिरूपणपूर्वकं बिन्दुरचनायाः सोदाहरणं निरूपणं कुरुत ।

**प्र-५ कयोश्चिद् द्वयोः परिचयं यच्छत । ०४**

१. विष्कम्भकः ।

२. चूलिका ।

३. अङ्कावतारः ।

**प्र-६ अधोलिखितकारिकां ग्रन्थमनुसृत्य विवृण्वत । ०३**

साक्षादिष्टार्थसम्भूतिः नायकस्य फलागमः ।

॥ तृतीयान्वितिः ॥

**प्र-७ सन्धिनामानि प्रतिपाद्य मुखप्रतिमुखसन्धिद्वयं सोदाहरणं यथाग्रन्थं विवृण्वत । ०८**

**अथवा**

**अवमर्शसन्ध्यङ्गानि प्रतिपाद्य केषाञ्चित् चतुर्णां निरूपणं कुरुत ।**

**प्र-८ सप्तप्रश्नानाम् एकवाक्येन उत्तरं लिखत । ०७**

१. विलासोत्कर्षः किम्?

२. को नाम विनयी?

३. किं नाम श्लिष्टम्?

४. अयुक्तमिति शब्दस्य कोऽर्थः?

५. नाट्यदर्पणकारः कः?

६. शोणितहेतुः प्रहारः कः?

७. प्रवेशकशब्दस्य का व्युत्पत्तिः?

८. पञ्चोपायाः के?

९. प्रथमविवेके कति कारिकाः सन्ति?

१०. प्रथमविवेकस्य नाम किम्?

**॥ चतुर्थान्वितिः ॥**

**प्र-९ अधोलिखितेषु कयोश्चिद् द्वयोः टिप्पणी लेख्या ।** **०४**

१. उपक्षेपः ।

२. उद्भेदः ।

३. परिभावना ।

**प्र-१० द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** **०८**

१. कुलस्त्री गृहवार्तायां पण्यस्त्री तु विपर्यये ।
विटे पत्यौ द्वयं तस्माद् एकविंशतिधाऽप्यदः ॥

२. उत्सृष्टिकाङ्कः पुंस्वामी, ख्यातवृत्तोत्थवृत्तवान् ।
भाणोक्तसन्धिवृत्यङ्कः वाग्युद्धः करुणाङ्किकः ॥

३. सर्वस्वामि-रसा विथी त्वेकाङ्का द्वयेकापत्रिका ।
मुखनिर्वाहसन्धिः स्यात्, सर्वरूपपयोगिनी ॥

**प्र-११ द्वयोः सोदाहरणं विवरणं कुरुत ।** **०४**

१. प्रपञ्चः सस्तवं हास्यम् ।

२. प्रश्नोत्तरं तु वाक्केली हास्या वाक् प्रतिवागपि ।

३. स्वच्छोक्तस्यान्यथाऽऽख्यानं यदवस्पन्दितं तु तत् ॥

**प्र-१२ अधोलिखितेषु चतुर्णां एकवाक्येन उत्तरं लिखत ।** **०४**

१. किं नाम स्पर्धनम्?

२. कपटः कतिधा?

३. काः चतस्रः वृत्तयः?

४. जीवाजीवोभयोत्थः कः?

५. किं नाम असत्प्रलापः?

६. परस्परं गूढभाषणं कस्य लक्षणम्?